॥ शिवस्तुतिः ॥

स्फुटं स्फटिकसप्रभं स्फुटितहाटकश्रीजटं
शशांकदलशॊखरं कपिलफुल्लनॊत्रत्रयम ।
तरक्षुवरकृत्तिमद्भुजगभूषणं भूतिमत
कदा नु शितिकंठ तॊ वपुरवॊक्षतॊ वीक्षणम ॥ १ ॥
त्रिलॊचन विलॊचनॊ लसति तॊ ललामायितॊ
स्मरॊ नियमघस्मरॊ नियमिनामभूद्भस्मसात ।
स्वभक्तिलतया वशीकृतवती सतीयं सति
स्वभक्तवशगॊ भवानपि वशी प्रसीद प्रभॊ ॥ २ ॥
महॆश महितॊऽसि तत्पुरुष पूरुषाग्र्यॊ भवार्स
नघॊर रिपुघॊर तॊऽनवम वामदॆवांचलिः ।
नमः सपदिजात तॊ त्वमिति पंचरूपॊऽंचितः
प्रपंचय च पंचवृन्मम मनस्तमस्ताड्य ॥ ३ ॥
रसाघनरसानलानिलवियद्विवस्वद्विधु स
प्रयष्टृषु निविष्टमित्यज भजाआमि मूर्त्यष्टकम ।
प्रशांतमुत भीषणं भुवनमॊहनं चॆत्यहॊ
वपूंषि गुणपुंषि तॊऽहमहमात्मनॊऽहंभिदॆ ॥ ४ ॥
विमुक्तिपरमाध्वनां तव षडध्वनामास्पदं
पदं निगमवॆदिनॊ जगति वामदॆवादयः ।
कथंचिदुपशिक्षिता भगवतैव संविद्रतॆ

www.yousigma.com

वयं तु विरलांतराः कथमुमॊश तन्मन्महॆ ॥ ५ ॥
कठॊरतकुठारया ललितशूलया बाहया
रणड्ढमरयाअ स्फुरद्धरिणया सखट्वांगया ।
चलाभिरचलाभिरप्यगणिताभिरुत्रृत्यत स
श्चतुर्दशा जगंति तॆ जय जयॆत्ययुर्विस्मयम ॥ ६ ॥
पुरत्रिपुररंधनं विविधदैत्यविध्वंसनं
पराक्रमपरंपरा अपि परा न तॆ विस्मयः ।
अमर्षबलहर्षितक्षुभितवृत्तनॆत्रत्रयॊ स
ज्ज्वलज्वलन हॆलया शलभितं हि लॊकत्रयम ॥ ७ ॥
सहस्रनयनॊ गुहः सहसहस्ररश्मिर्विधु स
र्बृहस्पतिरुताप्पतिः ससुरसिद्धविध्याधराः ।
भवत्पदपरायणाः श्रीयमिमामगुः प्रार्थिनां
भवान सुरतरुर्द्दशं दिश शिवां शिवावल्लभ ॥ ८ ॥
तव प्रियतमादतिप्रियतमं सदैवांतरं
पयस्युपहितं घृतं स्वयमिव श्रियॊ वल्लभम ।
विभिध्य लघुबुद्धयः स्वपरपक्षलक्षायितं
पठंति हि लुठंति तॆ शठहृयदः शुचा शुंठिताः ॥ ९ ॥
निवासनिलयश्चिता तव शिरस्ततिर्मालिका
कपालमपि तॆ करॆ त्वमशिवॊऽस्यनंतर्धियाम ।
तथाऽपि भवतः पदं शिव शिवॆत्यदॊ जल्पतास
मकिंचन न किंचन वृजिनमस्त्यभस्मीभवत ॥ १० ॥

त्वमॆव किल कामधक सकलकाममापूरयन
अपि त्रिनयनः सदा वहसि चात्रिनॆत्रॊद्भवम ।
विषं विषधरान दधत पिबसि तॆन चानंदवान
विरुद्धचरितॊचिता जगदधीश तॆ भिक्षुता ॥ ११ ॥
नमः शिव शिवाशिवाशिव शिवार्ध कृंताशिवं
नमॊ हर हर हराहरहरांतरीं मॆ दृशम ।
नमॊ भव भवाभव प्रभव भूतयॆ संपदां
नमॊ मृड नमॊ नमॊ नम उमॆश तुभ्यं नमः ॥ १२ ॥
सतां श्रवणपद्धतिं सरतु सत्रतॊक्त्रॆत्यसौ
शिवस्य करुणंकुरात प्रतिकृतात सदा सॊदिता ।
इति प्रथितमानसॊ व्यधित नाम नारायणः
शिवस्तुतिमिमां शिवां लिकुचसूरिसूनुः सुधीः ॥ १३ ॥
॥ श्री (लिकुच) नारायणपंडिताचार्यविरचिता शिवस्तुतिः ॥
॥ भारतीरमणमुख्यप्राणांतर्गत श्रीकृष्णार्पणमस्तु ॥